दिनाङ्क :- 11.05.2025 प्रात: - 06:55

<u>विदेशमन्त्रालयवार्ता:</u>

विदेश-सचिवः श्रीविक्रममिस्री अवोचत् यत् पाकिस्तानेन गतापराह्ने जातायाः सङ्घर्षविरामस्य परस्परसहमतेः वारं वारं उल्लङ्घनं क्रियते। वार्ताहरान् सम्बोधयन् श्रीमिस्त्रीः अवदत् यत् सशस्त्रसेनाः एतेषां उल्लंघनानां उपयुक्तं उचितं च प्रत्युत्तरं ददति। सममेव नवदिल्ली अपि स्थितिं गभीरदृष्ट्या अवलोकयति। भारतं पाकिस्तानं एतानि उल्लङ्घनानि प्रति उपयुक्तान् उत्तरदायित्वपूर्णान् च पदक्रमान् उत्थापयितुम् आह्वयति। श्री मिस्री एतदपि अवोचत् यत् सशस्त्रसेनाः स्थितिं सुदृढदृष्ट्या निरीक्षयन्ति। ताभ्यः निर्देशाः प्रदत्ताः सन्ति यत् ताः वारं वारं समुत्पन्नोल्लङ्घनानां सशक्ति प्रत्युत्तरं यच्छेयुः

---------------------------------------

<u>गृहसचिवसम्मेलनम्</u>

केन्द्रीयगृहसचिवः श्रीगोविन्दमोहनः ह्यः सीमावर्तिप्रदेशानां मुख्यसचिवैः सह दृश्यश्रव्यप्रणाल्या सम्मेलनं व्यदधात्। स्रोतसामनुसारं ते नागरिकप्रतिरक्षाप्रणालीं सर्वथा सिद्धावस्थायां स्थापयितुं निर्दिष्टाः यदि पारे सीम्नि पुनः गुलिकाचालनं भवेत् । इमे निर्देशाः सङ्घर्षविरामानन्तरम् आगताः ।

---------------------------------------

<u>सेनावार्ताहरसम्मेलनम्</u>

पाकिस्तानेन-कृत-उत्तेजक-कार्याचरणानां कारणेन महती हानिः सोढा अस्ति। भारतेन प्रत्युत्तरे सिन्दूराभियानान्तर्गतं पाकिस्तानस्य रक्षाक्रमणयोः प्रणाल्यः ध्वस्तीकृताः । वार्तहरान् सम्बोधयती भारतीयसेनायाः कर्नल् सोफ़िया कुरैशी अवदत् यत् भारतीयसशस्त्रसेनया केवलं चिह्नितेषु आतंकवादिस्थानेषु तथा च भारतं विरुध्य उपयुज्यमानस्थानेषु एव सटीकप्रहार: कृत:।कर्नल् कुरैशी पाकिस्तानस्य दुर्भावनापूर्णं मिथ्या सूचना-प्रसाराभियानस्य विषये अपि सूचितवती यत् पाकिस्तानं मिथ्याप्रचारं कुर्वदस्ति यत् तेन भारतीय-एस-चतुःशतं-प्रणाली नष्टीकृता, सूरतगढ-सिरसा-नगरयोः विमानक्षेत्रे चापि नष्टीकृते। पाकिस्तानेन प्रसारितानि एतानि मिथ्या-भ्रामक साक्ष्याणि सा निर्विवादरूपेण अस्वीकृतवती ।

----------------------------------------

<u>युद्ध विराम:</u>

गतापराह्णे भारत-पाकिस्तान देशौ युद्ध विरामे साहमत्यं प्रकटितवन्तौ। विदेश सचिव: विक्रम मिसरी अवोचत् यत् देशद्वयेन सैन्याभियानस्य स्थगने सहमति: प्रकटिता। अमुना उक्तं यत् पाकिस्तानस्य सैन्याभियानस्य महा-निदेशक: गत- अपराह्ने विषयेऽस्मिन् सहमतिं प्रकटितवान्। विदेशमत्रालस्य स्रोतोभि: सूचितं यत् देशद्वये संवादस्य अन्य विषयस्य च कापि सूचना नास्ति।

----------------------------------------

<u>प्रधानमन्त्रिणः उपवेशनम्</u>

प्रधानमन्त्री नरेन्द्र-मोदी रक्षा-मन्त्रिणा विदेशमन्त्रिणा रक्षाप्रमुखेन अथ च सैन्यत्रयस्य प्रमुखैः सह उपवेशनम् अकरोत्। इदम् उपवेशनं सङ्घर्षविरामानन्तरं नवदिल्ल्यां प्रधानमन्त्रिणः आवासे अभवत्। राष्ट्रिय-सुरक्षा-परामर्शदः अजीत डोभालः अपि उपवेशने उपस्थितः अवर्तत।

----------------------------------------

<u>बीसीसीआई आपीएल्</u>

भारतीयक्रिकेट्कण्ट्रोल्बोर्ड् बीसीसीआई इत्यस्य उपाध्यक्षः श्रीराजीवशुक्लः अवोचत् यत् बीसीसीआईकार्यसमितेः जनाः अद्यतन सम्मेलने आईपीएल् विषये निर्णयं स्वीकरिष्यन्ति।

।। <u>इति वार्ता:</u>।।